प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत् ।
मालती यूथिका कुन्दमाधवी केतकी तथा ॥
नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम् ।
अपराजिता च सुभद्रा तेषामुद्यानमीप्सितम् ॥
पूर्व्वे च दक्षिणे चैव शुभदं नात्र संशयः ।
ऊर्द्ध्वं षोड़शहस्तेभ्यो नेमं कुर्य्याद्दृढं गृही ॥
ऊर्द्ध्वं विंशति हस्तेभ्यः प्राकारं न शुभप्रदम् ।
सूत्रधारं तैलकारं स्वर्णकारञ्च हीरकम् ॥
वाटीमूले ग्राममध्ये न कुर्य्यात् स्थापनं बुधः ।
ब्राह्मणं क्षत्त्रियं वैश्यं सच्छूद्रं गणकं शुभम् ॥
भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके ॥*
प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम् ।
परितः शिविराणाञ्च गम्भीरं दशहस्तकम् ॥
मङ्गतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम् ।
शत्रोरगम्यं मित्त्रस्य गम्यमेव सुखेन च ॥
शाल्मलीनां तिन्तिड़ीनां हिन्तालानां तथैव च ।
निम्बानां सिन्धुवाराणां उड़म्बराणामभद्रकम्॥
धुस्तूराणां वटानाञ्चाप्येरण्डानामवाञ्छितम् ।
एतेषामतिरिक्तानां शिविरे काष्ठमीप्सितम् ॥
वृक्षञ्च वज्रहतकं दूरतो वर्जयेद्बुधः ।
पुत्त्रदारधनं हन्यादित्याह कमलोद्भवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे१०२अध्यायः ॥

शिवीरथः, पुं, याप्ययानम् । इति हारावली ॥

शिवेष्टः, पुं, ( शिवस्य इष्टः । ) वकवृक्षः । इति राजनिर्घण्टः ॥ शिवप्रिये, त्रि ॥

शिवेष्टा, स्त्री, ( शिवस्य इष्टा प्रिया । ) दूर्व्वा । इति राजनिर्घण्टः ॥

शिशिरः, पुं, ( शशति इतस्ततो गच्छतीति । शश + किरच् प्रत्ययेन साधुः । ) हिमः । इति मेदिनी ॥ ( विष्णुः । यथा, महाभारते । १३ । १४९ । ११० ।
"शब्दातिगः शब्दसहः शिशिरः शर्व्वरीकरः ॥")

शिशिरः, पुं, क्ली, (शशति गच्छति वृक्षादिशोभा यस्मात् । शश + "अजिरशिशिरशिथिलेति ।" उणा० १ । ५४ । इति किरच्प्रत्ययेन साधुः ।) ऋतुविशेषः । इत्यमरः ॥ स तु माघफाल्गुनमासद्वयात्मकः । तत्पर्य्यायः । कम्पनः २ शीतः ३ हिमकूटः ४ कोटनः ५ । क्वचित् पुस्तके कोटनस्थाने कोड़व इति पाठः । इति राजनिर्घण्टः ॥ तत्कालीनजलगुणा जलशब्दे द्रष्टव्याः ॥*॥ तत्र जातफलम् ॥
"मिष्टान्नभोगी मधुरप्रणादी
कलत्रपुत्त्रादियुतः क्षुधार्त्तः ।
क्रोधी सुधीश्चारुकलेवरश्च
यस्य प्रसूतिः शिशिराभिधाने ॥"
इति कोष्ठीप्रदीपः ॥*॥
तत्र वर्णनीयानि । करीषधूपः कुन्दः पद्मनाशः शिशिरोत्कर्षश्च । इति कविकल्पलता ॥*॥
अस्य गुणाः ।
"शिशिरं शीतलं रूक्षं शीतं वातप्रकोपणम् ।"
इति राजवल्लभः ॥
अपि च ।
"शिशिरः शीतलोऽतीवरूक्षो वाताग्निवर्द्धनः ।"
इति भावप्रकाशः ॥

शिशिरः, त्रि, (शश प्लुतगतौ + किरच्प्रत्ययेन साधुः ।) शीतगुणयुक्तः । यथाह अमरः ।
"शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जड़ः ।
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ॥"
(यथा, रघुः । १४ । ३ ।
"आनन्दजः शोकजमश्रु वाष्प-
स्तयोरशीतं शिशिरो बिभेद ॥)

शिशुः, पुं, (श्यतीति । शो + "शः कित् सन्वच्च ।" उणा० १ । २१ । इति उः ।) बालकः । तत्पर्य्यायः । पोतः २ पाकः ३ अर्भकः ४ डिम्भः ५ पृथुकः ६ शावकः ७ । इत्यमरः ॥ शावः ८ । अर्भः ९ शिशुकः १० पोतकः ११ भिटकः १२ इति शब्दरत्नावली ॥ गर्भः १३ । इति जटाधरः ॥ तस्य लक्षणादि यथा । वृद्धशातातपः ।
"शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् ।
रजस्वलादि संस्पृश्य स्नातव्यन्तु कुमारकैः ॥
प्राक् चूड़ाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः ।
कुमारस्तु स विज्ञेयो यावन्मौञ्जी न बन्धनम्॥"
इति गोपालन्यायपञ्चाननकृततत्स्मृतिनिर्णयः ॥
अपि च ।
"चतुर्थाद्वत्सरादूर्द्ध्वं यावदष्टौ समा वयः ।
शिशोर्व्रतं प्रकुर्व्वन्ति गुरुसम्बन्धिबान्धवाः ॥"
इति ब्रह्मपुराणवचनम् ॥
"जातमात्रः शिशुस्तावत् यावदष्टौ समा वयः ।
स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शकः ॥
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते ।
तस्मिन् काले न दोषः स्यात् स यावन्नोपनीयते ॥"
इति मनुवचनम् ॥*॥
तस्याध्यापनक्रमो यथा,—
"प्राङ्मुखो गुरुरासीनो वरुणाभिमुखं शिशुम्
अध्यापयेच्च प्रथमं द्विजाशीर्भिः प्रपूजितम् ॥"
इति मलमासतत्त्वे बृहस्पतिवचनम् ॥*॥
शिशुपुत्त्रं त्यक्त्वा प्रव्रज्याश्रमनिषेधो यथा,—
"मातरं पितरं वृद्धं भार्य्याञ्चैव पतिव्रताम् ।
शिशुञ्च तनयं हित्वा नावधूताश्रमं व्रजेत् ॥"
इति महानिर्व्वाणतन्त्रम् ॥
अन्यद्बालशब्दे द्रष्टव्यम् ॥*॥ (कुमारः । कार्त्तिकेयः यथा, महाभारते । ३ । २३१ । ४ ।
"शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः ॥")

शिशुकः, पुं, (शिशोरिव प्रतिकृतिः । शिशु + इवार्थे कन् ।) जलजन्तुविशेषः । शुशुक् इति भाषा । तत्पर्य्यायः । उलूपी २ । इत्यमरः ॥ ह उपल इति ख्याते अति चञ्चले मत्स्ये । शिशुमाराकृतिर्मत्स्यभेदः उलूपी । इति कलिङ्गादयः । शोशु इति ख्यातो मत्स्यविशेषः उलूपीत्यन्ये । शीँगाल इति ख्याते इत्येके । शिशुमार एव उच्यते इति सर्व्वस्वम् । तथा च रत्नकोषादौ 'चुलुपी शिशुमारः स्यादुलूपी शिशुकस्तथा ।' ऊर्द्ध्वं लुम्पति भ्राम्यति उलूपी लुप लृ श प जौ छेदे उत्पूर्व्वः शकादित्वाण्णिन् मनोपादित्वात् तल्लोपः लोर्दीर्घश्च ह्रिङ्गत्वोकारोऽपि । 'शिशुकस्तूलुपी बालः प्रोष्ठी तु सफरी द्वयोः ।' इति वाचस्पतिः । चुलुपीति चवर्गादिपाठ इति केचित् । शिशुरिव शिशुकः ।
'शिशुकः शिशुमारेऽपि बालकोलुपिनोरपि ॥'
इति रुद्रः ॥"
इति भरतः ॥ अपि च ।
"उलुपी स्यादुलुपीव चुलुम्पी चुलुकी तथा ।
शिशुकश्चेति पर्य्यायः शिशुमाराकृतौ झसे ।
केचिदुत्पलमत्स्ये तु पर्य्यायोऽयं निगद्यते ॥"
इति शब्दरत्नावली ॥
"शिशुकः शिशुमारश्च स च ग्राहो वराहकः ॥"
इति राजनिर्घण्टः ॥ * ॥
शिशुमारः । (यथा, महाभारते ।१२।२८।२७।
"कूर्म्मान् कर्कटकान् नक्रान् मकरान् शिशुकानपि ॥" )
बालकः । इति मेदिनी ॥ (यथा, कथासरित्सागरे । २१ । ३९ ।
"शिशुकद्वयसंयुक्ता ब्राह्मणी कापि दुर्गता ।
द्वारि स्थिता महाराज देवदर्शनकाङ्क्षिणी ॥")
वृक्षविशेषः । इति हेमचन्द्रः ॥

शिशुगन्धा, स्त्री, (शिशोर्गन्धो यत्र ।) मल्लिकाविशेषः । यथा—
"लक्ष्मीपतिर्लवङ्गे स्यात् नीमाली नवमालिका
शिशुगन्धा मधुमल्ली तथा करुणमल्लय ॥"
इति शब्दमाला ॥

शिशुचान्द्रायणं, क्ली, (शिशुरिव चान्द्रायणम् । स्वल्पचान्द्रायणमित्यर्थः ।) व्रतविशेषः । यथा,
"चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम् ॥"
इति मनुः ॥

शिशुता, स्त्री, ( शिशोर्भावः । शिशु + तल् । ) शिशुत्वम् । शिशोरवस्था । इति जटाधरः ॥

शिशुत्वं, क्ली, (शिशोर्भावः । शिशु + त्व ।) शैशवम् । इत्यमरः ॥ तत्पर्य्यायः बाल्यशब्दे द्रष्टव्यः॥

शिशुपालः, पुं, चेदिदेशीयराजः । स तु कृष्णेन हतः । शिशुपालवधकाव्यं माघेन कृतम् । तत्पर्य्यायः । दमघोषसुतः २ चैद्यः ३ चेदिराड् ४ । इति जटाधरः ॥ शिशुपालकः ५ । इति त्रिकाण्डशेषः ॥ ( यथा, भागवते । ७ । १० । ३८ ।
"ताविहाथ पुनर्जातौ शिशुपालकरूषजौ ।
हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः ॥" )

शिशुपालकः, पुं, शिशुपाल + स्वार्थे कन् । ) दमघोषसुतः । इति त्रिकाण्डशेषः ॥ केलिकदम्बवृक्षः । इति शब्दचन्द्रिका ॥ ( शिशुं